# Shrutisarasamuddharanam

# શ્રુતિસારસમુદ્ધરણમ્

## Document Information

Text title : Shrutisarasamuddharanam

File name : shrutisAra.itx

Category : vedanta, major_works

Location : doc_z_misc_major_works

Author : Totakacharya (Adi Sankaracharya's Disciple)

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : Totakacharya's work on Advaita

Latest update : January 23, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# શ્રુતિસારસમુદ્ધરણમ્

ત્રૈલોક્યનાથહરિમીડ્યમુદારસત્ત્વં
શક્તેસ્તનૂજતનયં પરમેષ્ઠિકલ્પમ્ ।
જીમૂતમુક્તવિમલામ્બરચારુવર્ણં
વાસિષ્ઠમુગ્રતપસં પ્રણતોઽસ્મિ નિત્યમ્ ॥ ૧॥

સકલં મનસા ક્રિયયા જનિતં
સમવેક્ષ્ય વિનાશિતયા તુ જગત્ ।
નિરવિદ્યત કશ્ચિદતો નિખિલા-
દવિનાશિ કૃતેન ન લભ્યમિતિ ॥ ૨॥

પ્રતિપિત્સુરસાવવિનાશિ પદં
યતિધર્મરતો યતિમેવ ગુરુમ્ ।
વિદિતાત્મસતત્ત્વમુપેત્ય કવિં
પ્રણિપત્ય નિવેદિતવાન્સ્વમતમ્ ॥ ૩॥

ભગવન્નુદધૌ મૃતિજન્મજલે
સુખદુઃખઝષે પતિતં વ્યથિતમ્ ।
કૃપયા શરણાગતમુદ્ધર મા-
મનુશાધ્યુપસન્નમનન્યગતિમ્ ॥ ૪॥

વિનિવર્ત્ય રતિં વિષયે વિષમાં
પરિમુચ્ય શરીરનિબદ્ધમતિમ્ ।
પરમાત્મપદે ભવ નિત્યરતો
જહિ મોહમયં ભ્રમમાત્મમતેઃ ॥ ૫॥

વિસૃજાન્નમયાદિષુ પઞ્ચસુ તા-
મહમસ્મિ મમેતિ મતિં સતતમ્ ।
દૃશિરૂપમનન્તમૃતં વિગુણં
હૃદયસ્થમવેહિ સદાહમિતિ ॥ ૬॥

જલભેદકૃતા બહુતેવ રવે -
ર્ઘટિકાદિકૃતા નભસોઽપિ યથા ।
મતિભેદકૃતા તુ તથા બહુતા
તવ બુદ્ધિદૃશોઽવિકૃતસ્ય સદા ॥ ૭॥

દિનકૃત્પ્રભયા સદૃશેન તદા
જનધીચરિતં સકલે સ્વચિતા ।
વિદિતં ભવતાઽવિકૃતેન સદા
યત એવમતોઽસિત એવ સદા ॥ ૮॥

ઉપરાગમપેક્ષ્ય મતિર્વિષયૈ-
ર્વિષયાવધૃતિં કુરુતે તુ યતઃ ।
તત એવ મતેર્વિદિતાવિદિતા
વિષયાસ્તુ તતઃ પરિણામવતી ॥ ૯॥

મતિવૃત્તય આત્મચિતા વિદિતાઃ
સતતં હિ યતોઽવિકૃતસ્તુ તતઃ ।
યદિ ચાત્મચિતિઃ પરિણામવતી
મતયો વિદિતાવિદિતાઃ સ્યુરિમાઃ ॥ ૧૦॥

ચરિતં તુ ધિયઃ સકલં સતતં
વિદિતં ભવતા પરિશુદ્ધચિતા ।
મતિભેદગુણો ન હિ તેઽસ્તિ તતો
યત એવમતોઽસદૃશસ્તુ ધિયા ॥ ૧૧॥

વિદિતત્વમવિપ્રતિપન્નતયા
મતિષુ પ્રગતં વિષયેષુ યથા ।
યત એવમતઃ પરસંવિદિતા
વિદિતત્વત એવ યથા વિષયાઃ ॥ ૧૨॥

પરસંવિદિતાઃ સતતં હિ યતો
ન વિદુઃ સ્વમમી વિષયાસ્તુ તતઃ ।
મતયોઽપિ તથા પરસંવિદિતા
ન વિદુઃ સ્વમમૂર્વિષયાસ્તુ યથા ॥ ૧૩॥

વિષયાકૃતિસંસ્થિતિરેકવિધા

મનસસ્તુ સદા વ્યવહારવિધૌ ।
અહમિત્યપિ તદ્વિષયા ત્વપરા
મતિવૃત્તિરવજ્વલિતાત્મચિતા ॥ ૧૪॥

પુરુષસ્ય તુ ધર્મવદુદ્ભવતિ
સ્વરસેન મતેઃ સ્વગુણોઽપિ યતઃ ।
અત આત્મગુણં પ્રતિયન્તિ જના
મતિવૃત્તિમિમામહમિત્યબુધાઃ ॥ ૧૫॥

યદિ સા ન ભવેજ્જનમોહકરી
વ્યવહારમિમં ન જનોઽનુભવેત્ ।
વિફલશ્ચ તદા વિષયાનુભવો
જ્ઞગુણો ન હિ સેતિ યદા વિદિતા ॥ ૧૬॥

ઉપલભ્યઘટાદિનિભૈવ ભવે-
ન્મનસો યદિ સંસ્થિતિરેકવિધા ।
પુરુષસ્ય ચિતિશ્ચ ન વિક્રિયતે
મતિવૃત્તિમપેક્ષ્ય ઘટાદિનિભામ્ ॥ ૧૭॥

અવગન્ત્રવગમ્યચિદાત્મધિયો-
રહમિત્યભિમાનવિહીનતયા ।
સ્થિતયોરભિમાનપુરઃસરકં
વ્યવહારપથં ન જનોઽવતરેત્ ॥ ૧૮॥

અહમીક્ષ ઇતિ પ્રથમં હિ ધિયા
સુવિચિન્ત્ય તતો વિષયાભિમુખમ્ ।
નયનં પ્રહિણોતિ તથાન્યદપિ
શ્રવણાદિ વિયત્પ્રમુખસ્ય ગુણે ॥ ૧૯॥

અપહાય ન કશ્ચિદહઙ્કરણં
વ્યવહારમુપૈતિ કદાચિદપિ ।
ઉપપન્નતરા હિ મતેસ્તુ તતો
વ્યવહારપથં પ્રતિ કારણતા ॥ ૨૦॥

ચિતિશક્તિગુણઃ કિમહઙ્કરણં
કિમુ બુદ્ધિગુણોઽથ ભવેદુભયોઃ ।
ઇતિ ચિન્ત્યમિદં મનસાનલસૈ-

રુપપત્તિભિરાત્મહિતં યતિભિઃ ॥ ૨૧॥

ઉપલભ્યમહઙ્કરણં ન ભવે-
ત્પુરુષસ્ય ગુણો યદિ તર્હિ ભવેત્ ।
ગુણિરૂપમથાવયવં ગુણિનો
ન વિહાય ગુણઃ પૃથગસ્તિ યતઃ ॥ ૨૨॥

ન ગુણો ગુણિનિ સ્થિતવાન્ગુણિના
વિષયીક્રિયતે ન ચ તસ્ય ગુણૈઃ ।
ન હિ દેશકૃતા ન ચ વસ્તુકૃતા
ગુણિનોઽસ્તિ ગુણસ્ય ભિદા તુ યતઃ ॥ ૨૩॥

ન પરસ્પરમગ્નિગુણોઽગ્નિગતો
વિષયત્વમુપૈતિ કદાચિદપિ ।
ન હિ વહ્નિરપિ સ્વગુણં સ્વગતં
વિષયીકુરુતે સ્વગુણેન ભુવિ ॥ ૨૪॥

કણભુગ્યમચીક્લૃપદાત્મગુણં
ગુણપૂગમનિત્યમનાત્મગુણમ્ ।
અનયૈવ દિશા સ નિરાક્રિયતાં
ન હિ નિત્યમનિત્યગુણેન ગુણિ ॥ ૨૫॥

વિયતઃ પ્રભવં પ્રવદન્તિ યતઃ
શ્રુતયો બહુશઃ ખમનિત્યમતઃ ।
ઉપમાનમનિત્યગુણં વિયતો
ન હિ નિત્યમિહાસ્તિ કણાદમતે ॥ ૨૬॥

મનસા પુરુષઃ પુરુષેણ મનો
નભસા મુસલં મુસલેન નભઃ ।
ન હિ યોગવિયોગમુપૈતિ કુતો-
ઽવયવિત્વનિરાકરણાદમુતઃ ॥ ૨૭॥

ઇહ રજ્જુઘટાદિ હિ સાવયવં
સમુપૈતિ યુજામિતરેતરતઃ ।
ઇતિ દૃષ્ટમતોઽન્યદદૃષ્ટમપિ
સ્વયમૂહ્યમિદં ન પરિત્યજતા ॥ ૨૮॥

ન હિ સાવયવં વિગતાવયવૈ-
ર્વિગતાવયવં ચ ન સાવયવૈઃ ।
ઉપયાતિ યુજામિતિ દૃષ્ટમિદં
યત એવમતઃ સ્થિતમુક્તમદઃ ॥ ૨૯॥

ન હિ કલ્પિતભાગસમાગમનં
વિગતાવયવસ્ય ઘટેત કુતઃ ।
વિતથત્વમતિઃ સુદૃઢા તુ યતઃ
પરિકલ્પિતવસ્તુષુ નિત્યમતઃ ॥ ૩૦॥

ઇહ વેદશિરઃસુ તદર્થવિદઃ
પ્રવદન્તિ સમસ્તજગત્પ્રકૃતિમ્ ।
પરમાત્મપદં દૃશિમાત્રવપુ-
ર્ધ્રુવમેકમતોઽન્યદનિત્યમિતિ ॥ ૩૧॥

અત એવ ન કિઞ્ચિદુદાહરણં
ધ્રુવમસ્તિ પરસ્ય વિનાશિગુણમ્ ।
યત એવમતઃ સ્થિતમુક્તમદો
ન હિ નિત્યમનિત્યગુણેન ગુણિ ॥ ૩૨॥

ઉપલભ્યમહઙ્કરણં ભવિતું
ક્ષમતે દૃશિરૂપગુણો ન યતઃ ।
વિષયાકૃતિરઞ્જિતધીગુણવ-
દ્વિષયત્વમહઙ્કરણસ્ય તતઃ ॥ ૩૩॥

વિષયપ્રકૃતિં પ્રતિપન્નવતીં
મતિવૃત્તિમહઙ્કરણં ચ મતેઃ ।
ઉભયં પરિપશ્યતિ યોઽવિકૃતઃ
પરમાત્મસદુક્તિરસૌ પુરુષઃ ॥ ૩૪॥

નનુ દેહભૃદેષ કથં ભવતા-
ભિહિતઃ પરમાત્મસદુક્તિરિતિ ।
ન વિરુદ્ધમવાદિષમેતમહં
શ્રુતિરપ્યમુમર્થમુવાચ યતઃ ॥ ૩૫॥

અમતં ન મતેરમતસ્તદિદં
યદમુત્ર તદેવ તુ કશ્ચિદિતિ ।

શ્રુતિષુ પ્રતિપાદિતમસ્ય દૃશેઃ
પરમાત્મપદત્વમમૂષુ ભૃશમ્ ॥ ૩૬॥

યદનભ્યુદિતં વદનેન સદા
નયનેન ચ પશ્યતિ યન્ન સદા ।
શ્રવણેન ચ યન્ન શૃણોતિ સદા
મનસાપિ ચ યન્મનુતે ન સદા ॥ ૩૭॥

વદનં નયનં ચ તથા શ્રવણં
મન એવ ચ યેન મતં સતતમ્ ।
અવગચ્છ તદેવ પદં પરમં
ત્વમિતિ શ્રુતિરીક્ષિતુરુક્તવતી ॥ ૩૮॥

પરમાત્મપદત્વ ઇયં ચ મયા
શ્રુતિરલ્પકણોક્તિરિહાભિહિતા ।
અણિમાદિગુણં સદિતિ પ્રકૃતં
તદસિ ત્વમિતિ શ્રુતિરભ્યવદત્ ॥ ૩૯॥

નભસોઽવયવો વિકૃતિશ્ચ યથા
ઘટિકાદિનભો ન ભવેત્તુ તથા ।
પરમાત્મન એષ ન ચાવયવો
વિકૃતિશ્ચ શરીરભૃદિત્યમૃષા ॥ ૪૦॥

કરકાદિનિમિત્તકમેવ યથા
કરકામ્બરનામ ભવેદ્વિયતઃ ।
પરમાત્મદૃશેરપિ નામ તથા
પુરહેતુકમેવ તુ જીવ ઇતિ ॥ ૪૧॥

જનિતં વિયદગ્રણિ યેન જગ-
ત્પરમાત્મસદક્ષરનામભૃતા ।
પ્રવિવેશ સ એવ જગત્સ્વકૃતં
ખમિવેહ ઘટં ઘટસૃષ્ટિમનુ ॥ ૪૨॥

ઉદપદ્યત ખપ્રમુખં હિ જગ-
ત્પરમાત્મન ઇત્યપિ યાઃ શ્રુતયઃ ।
અવધાર્યત આભિરભેદમતિઃ
પરમાત્મસતત્ત્વસમર્પણતઃ ॥ ૪૩॥

યદિ સૃષ્ટિવિધાનપરં વચનં
ફલશૂન્યમનર્થકમેવ ભવેત્ ।
જગદિત્થમજાયત ધાતુરિતિ
શ્રવણં પુરુષસ્ય ફલાય ન હિ ॥ ૪૪॥

અનૃતત્વમવાધસકૃદ્વિકૃતે-
ર્નિરધારિ સદેવ તુ સત્યમિતિ ।
શ્રુતિભિર્બહુધૈતદતોઽવગતં
જગતો ન હિ જન્મ વિધેયમિતિ ॥ ૪૫॥

ન ચ તત્ત્વમસીત્યસકૃદ્વચનં
જગતો જનિમાત્રવિધૌ ઘટતે ।
પરમાત્મપદાનુમતિં તુ યદા
જનયેત્પુરુષસ્ય તદા ઘટતે ॥ ૪૬॥

સ્થિરજઙ્ગમદેહધિયાં ચરિતં
પરિપશ્યતિ યોઽવિકૃતઃ પુરુષઃ ।
પરમાત્મસદુક્તિરસાવિતિ ય-
દ્ભણિતં તદતિષ્ઠિપમિત્થમહમ્ ॥ ૪૭॥

પૃથગેવ યદાક્ષરતો મતિવિ-
ન્મકરોદકવન્ન ઘટામ્બરવત્ ।
ન વિરોત્સ્યતિ તત્ત્વમસીતિ તદા
વચનં કથમેષ ત ઇત્યપિ ચ ॥ ૪૮॥

ન તુ વસ્તુસતત્ત્વવિબોધનકૃ-
દ્વિનિવર્તયદપ્રતિબોધમિદમ્ ।
સદુપાસનકર્મવિધાનપરં
યત એવમતો ન વિરોત્સ્યતિ મે ॥ ૪૯॥

મનાદિષુ કારણદૃષ્ટિવિધિઃ
પ્રતિમાસુ ચ દેવધિયાં કરણમ્ ।
સ્વમતિં હ્યનપોહ્ય યથા તુ તથા
ત્વમસીહ સદાત્મમતિર્વચનાત્ ॥ ૫૦॥

અથ વા ત્વમિતિ ધ્વનિવાચ્યમિદં

સદસીતિ વદેદ્વચનં ગુણતઃ ।
વિભયં પુરુષં પ્રવદન્તિ યથા
મૃગરાડયમીશ્વરગુપ્ત ઇતિ ॥ ૫૧॥

યદિ વા સ્તુતયે સદસીતિ વદે-
ન્મઘવાનસિ વિષ્ણુરસીતિ યથા ।
ત્વમિતિ શ્રુતિવાચ્યસતત્ત્વકતા-
મથ વા સત એવ વદેદ્વચનમ્ ॥ ૫૨॥

યદિ તત્ત્વમિતિ ધ્વનિનાભિહિતઃ
પરમાત્મસતત્ત્વક એવ સદા ।
કિમિતિ સ્વકમેષ ન રૂપમવે-
ત્પ્રતિબોધ્યત એવ યતો વચનૈઃ ॥ ૫૩॥

અત એવ હિ જીવસદાત્મકતાં
ન હિ તત્ત્વમસીતિ વદેદ્વચનમ્ ।
યદપીદૃશમન્યદતો વચનં
તદપિ પ્રથયેદનયૈવ દિશા ॥ ૫૪॥

ત્વદુદાહૃતવાક્યવિલક્ષણતા
વચનસ્ય હિ તત્ત્વમસીતિ યતઃ ।
અત એવ ન દૃષ્ટિવિધાનપરં
સત એવ સદાત્મકતાગમકમ્ ॥ ૫૫॥

ઇતિશબ્દશિરસ્કપદોક્તમતિ-
ર્વિહિતા મનાદિષુ તૈર્વચનૈઃ ।
ન વિધાનમિહાસ્તિ તથા વચને
સુવિલક્ષણમેતદતો વચનાત્ ॥ ૫૬॥

મનસો વિયતઃ સવિતૃપ્રભૃતેઃ
પ્રવદન્તિ ન તાનિ સદાત્મકતામ્ ।
મનાદિ હિ મુખ્યમુપાસ્યતયા
પ્રવદન્તિ યતોઽક્ષરદૃષ્ટિયુતમ્ ॥ ૫૭॥

કરકો ન મૃદઃ પૃથગસ્તિ યથા
મનાદિ સતોઽસ્તિ તથા ન પૃથક્ ।
ઇતિ વસ્તુસતત્ત્વકતા તુ યદા

વિધિશબ્દ ઇતિશ્ચ તદા તુ વૃથા ॥ ૫૮॥

મનાદિ સમાનવિભક્તિતયા
વિધિશબ્દમિતિં ચ વિહાય યદિ ।
જનકેન સતા સહ યોગમિયા-
દનૃતં તદિતિ સ્ફુટમુક્તમભૂત્ ॥ ૫૯॥

નનુ જીવસતોરપિ તત્ત્વમિતિ
સ્ફુટમેકવિભક્ત્યભિધાનમિદમ્ ।
કથમસ્ય શરીરભૃતોઽનૃતતા
ન ભવેદવિભક્તવિભક્તિયુજઃ ॥ ૬૦॥

પ્રકૃતેરભિધાનપદેન યદા
વિકૃતેરભિધાનમુપૈતિ યુજામ્ ।
અનૃતત્વમતિસ્તુ તદા વિકૃતૌ
મૃદયં ઘટ ઇત્યભિધાસુ યથા ॥ ૬૧॥

વિકૃતિત્વમવાદિ મનઃપ્રભૃતે-
ર્બહુશઃ શ્રુતિષુ પ્રકૃતેસ્તુ સતઃ ।
અત એવ સમાનવિભક્તિતયા
મનાદિ સુવેદ્યમસત્યમિતિ ॥ ૬૨॥

જનિતત્વમવાદિ ન હિ શ્રુતિભિ-
ર્જનકેન સતાસ્ય શરીરભૃતઃ ।
મનાદિવિકારવિલક્ષણતાં
પ્રતિયન્તિ શરીરભૃતસ્તુ તતઃ ॥ ૬૩॥

યદજીજનદમ્બરપૂર્વમિદં
જગદક્ષરમીક્ષણવિગ્રહકમ્ ।
પ્રવિવેશ તદેવ જગત્સ્વકૃતં
સ ચ જીવસમાખ્ય ઇતિ શ્રુતયઃ ॥ ૬૪॥

પરમાત્મવિકારવિભક્તમતિ-
ર્ન ભવત્યત એવ શરીરભૃતઃ ।
યત એવ વિકારવિભિન્નમતિ-
ર્ન ભવત્યત એવ મૃષાત્વમતિઃ ॥ ૬૫॥

અવિભક્તવિભક્ત્યભિધાનકૃતા
પરમાત્મપદેન શરીરભૃતઃ ।
ન ભવેદિહ તત્ત્વમસિપ્રભૃતૌ
લવણં જલમિત્યભિધાસુ યથા ॥ ૬૬॥

પરમાત્મવિકારનિરાકરણં
કૃતમસ્ય શરીરભૃતસ્તુ યતઃ ।
પરમેશ્વરરૂપવિલક્ષણતા
ન મનાગપિ દેહભૃતોઽસ્તિ તતઃ ॥ ૬૭॥

નનુ જીવસતોરણુમાત્રમપિ
સ્વગતં ન વિશેષણમસ્તિ યદા ।
વદ તત્ત્વમસીતિ તદા વચનં
કિમુ વક્તિ તથૈષ ત ઇત્યપિ ચ ॥ ૬૮॥

સ્વગતં યદિ ભેદકમિષ્ટમભૂ-
દણુમાત્રમપીશ્વરદેહભૃતોઃ ।
અપનેતુમશક્યમદો વચનૈ-
રમુનાસ્ય પૃથક્ત્વનિષેધપરૈઃ ॥ ૬૯॥

ઇહ યસ્ય ચ યો ગુણ આત્મગતઃ
સ્વત એવ ન જાતુ ભવેત્પરતઃ ।
વચનેન ન તસ્ય નિરાકરણં
ક્રિયતે સ ગુણઃ સહજસ્તુ યતઃ ॥ ૭૦॥

વચનં ત્વવબોધકમેવ યત-
સ્તત એવ ન વસ્તુવિપર્યયકૃત્ ।
ન હિ વસ્ત્વપિ શબ્દવશાત્પ્રકૃતિં
પ્રજહાત્યનવસ્થિતિદોષભયાત્ ॥ ૭૧॥

યત એવમતો વિષયસ્ય ગુણં
વિષયેણ સહાત્મનિ મૂઢધિયા ।
અધિરોપિતમપ્સ્વિવ ભૂમિગુણં
પ્રતિષેધતિ તત્ત્વમસીતિ વચઃ ॥ ૭૨॥

અત એવ ન દૃષ્ટિવિધાનપરં
ગુણવાદપરં ચ ન તદ્વચનમ્ ।

સ્તુતિવાદ્યપિ નૈતદુપાસ્યતયા
વિધિરત્ર ન દેહભૃતોઽસ્તિ યતઃ ॥ ૭૩॥

સત એવ હિ નામ જગત્પ્રકૃતે-
રુપધાનવશાદિહ જીવ ઇતિ ।
અત એવ ન જીવસતત્ત્વકતાં
પ્રકૃતસ્ય સતઃ પ્રતિપાદયતિ ॥ ૭૪॥

યદિ જીવસતત્ત્વકતાં ગમયે-
દણિમાદિગુણસ્ય જગત્પ્રકૃતેઃ ।
અણિમાદિગુણોક્તિરતોઽસ્ય મૃષા
યદિ વાસ્ય શરીરભૃદાત્મકતા ॥ ૭૫॥

ન ચ સંસૃતિહેતુનિરાકરણં
કૃતમસ્ય શરીરભૃતોઽભિમતમ્ ।
પરમેશ્વરમાત્મતયા બ્રુવતા
વચનેન ચ તત્ત્વમસીત્યમુના ॥ ૭૬॥

ત્વમસીતિ પદદ્વયમેતિ યુજાં
તદિતિ ધ્વનિના સહ તત્ત્વમિતિ ।
ક્રિયયા સહ નામપદં સમિયા-
ન્નિરપેક્ષમુપૈત્યનયા હિ યુજામ્ ॥ ૭૭॥

ન હિ નામસહસ્રમપિ ક્રિયયા
રહિતં કિમપિ પ્રતિપાદયતિ ।
પ્રતિપાદકમેષુ લિઙાદિ ભવે-
દ્વિહિતાદિમતેર્જનકં હિ યતઃ ॥ ૭૮॥

ભગવાનપિ મધ્યમમેવ યતો
વિનિયચ્છતિ યુષ્મદિ નિત્યમતઃ ।
પ્રથમં ત્વમસીતિ પદે સમિત-
શ્ચરમં ત્વસિના સમિયાત્તદિતિ ॥ ૭૯॥

પુરુષોઽભિહિતસ્ત્વમસીતિ યદા
કિમસાનિ વદેતિ તદાભિમુખઃ ।
શ્રવણાય ભવેદણિમાદિગુણં
સદિતિ પ્રકૃતં તદસીતિ વદેત્ ॥ ૮૦॥

ત્વમિતિ ધ્વનિનાભિહિતસ્ય યત-
સ્તદિતિ શ્રુતિવાચ્યસદાત્મકતામ્ ।
અવદદ્વચનં તત એવ સતો
ન હિ જીવસતત્ત્વકતાં વદતિ ॥ ૮૧॥

વિષયાભિમુખાનિ શરીરભૃતઃ
સ્વરસેન સદા કરણાનિ યતઃ ।
સ્વકમેષ ન રૂપમવૈતિ તતઃ
પ્રતિબોધ્યત એવ તતો વચનૈઃ ॥ ૮૨॥

વચનં ચ પરાગ્ચિપુરઃસરકં
બહુ વૈદિકમત્ર તથા સ્મરણમ્ ।
વિષયેષુ ચ નાવમિવામ્ભસિ ય-
ન્મનસેન્દ્રિયરશ્મિવિનિગ્રહવત્ ॥ ૮૩॥

ઇયતા હિ ન દેહભૃતોઽસ્તિ ભિદા
પરમાત્મદૃશેરિતિ વાચ્યમિદમ્ ।
સ્થિતિકાલ ઇહાપિ ચ સૃષ્ટિમુખે
સદનન્યતયા શ્રુત એષ યતઃ ॥ ૮૪॥

દ્વયમપ્યવિરોધિ શરીરભૃતો
વચનીયમિદં રઘુનન્દનવત્ ।
ઉપદેશમપેક્ષ્ય સદાત્મમતિઃ
પરમાત્મસતત્ત્વકતા ચ સદા ॥ ૮૫॥

સદુપાસનમસ્ય વિધેયતયા
વચનસ્ય મમ પ્રતિભાતિ યતઃ ।
અત એવ ન જીવસદાત્મકતાં
પ્રતિબોધયતીત્યવદત્તદસત્ ॥ ૮૬॥

સદુપાસ્સ્વ(?) ઇતિ શ્રુતિરત્ર ન તે
તદસિ ત્વમિતિ શ્રુતિરેવમિયમ્ ।
યત એવમતો ન વિધિત્સતતા
સદુપાસનકર્મણ ઇત્યમૃષા ॥ ૮૭॥

યદિ તસ્ય કુતશ્ચિદિહાનયનં

ક્રિયતે તદનર્થકમેવ ભવેત્ ।
પુરુષેણ કૃતસ્ય યતઃ શ્રુતિતા
ન ભવેદિતિ વેદવિદાં સ્મરણમ્ ॥ ૮૮॥

કિમરે પુરુષં પ્રતિબોધયિતું
સ્વકમર્થમશક્તમિદં વચનમ્ ।
યદતોઽન્યત આનયનં ક્રિયતે
ભવતા શ્રવણેન વિનાપિ વિધેઃ ॥ ૮૯॥

શ્રુતહાનિરિહાશ્રુતક્લૃપ્તિરપિ
શ્રુતિવિત્સમયો ન ભવેત્તુ યતઃ ।
શ્રુતિભક્તિમતા શ્રુતિવક્ત્રગતં
ગ્રહણીયમતો ન તુ બુદ્ધિવશાત્ ॥ ૯૦॥

પુરુષસ્ય શરીરગતાત્મમતિં
મૃતિસમ્ભવહેતુમનર્થકરીમ્ ।
અપનીય સદાત્મમતિં દધતી
મહતે પુરુષસ્ય હિતાય ભવેત્ ॥ ૯૧॥

વિનિવર્તત એવ શરીરગતા
વિપરીતમતિઃ પુરુષસ્ય તદા ।
વચનેન તુ તત્ત્વમસીતિ યદા
પ્રતિબોધ્યત એષ ત ઇત્યપિ ચ ॥ ૯૨॥

યદિ નાપનયેચ્છ્રુતિરાત્મમતિં
પુરુષસ્ય શરીરગતામનૃતામ્ ।
તદહમ્મતિહેતુકકર્મગતિં
સુખદુઃખફલામવશોઽનુભવેત્ ॥ ૯૩॥

યદિ તત્ત્વમસીતિ વદેદ્વચનં
સદુપાસનકર્મ ન તત્ત્વમિતિ ।
પુરુષસ્ય ફલં સદુપાસનતો
વિમૃશામિ ભવિષ્યતિ કીદૃગિતિ ॥ ૯૪॥

પુરુષસ્ય તુ મર્ત્યગુણસ્ય ભવે-
ત્સદુપાસનયા ન સદાત્મકતા ।
ન કથઞ્ચિદપિ પ્રજહાતિ યતઃ

પ્રકૃતિં સહજામિહ કશ્ચિદપિ ॥ ૯૫॥

યદિ દેહભૃદેષ સદાત્મકતાં
પ્રગમિષ્યતિ વૈ સદુપાસનયા ।
ન ચ હાસ્યતિ રૂપમસૌ હિ નિજં
યત ઐક્યમતિર્ન ભરત્યુભયોઃ ॥ ૯૬॥

રસવિદ્ધમયઃ પ્રકૃતિં સહજાં
પ્રવિહાય યથા કનકત્વમિયાત્ ।
પુરુષોઽપિ તથા સદુપાસનયા
પ્રતિપત્સ્યત એવ સદાત્મકતામ્ ॥ ૯૭॥

અયસોઽવયવાનભિભૂય રસઃ
સ્થિતવાનનલાનુગૃહીતિમનુ ।
કનકત્વમતિં જનયત્યયસિ
પ્રતિપન્નમયો ન તુ કાઞ્ચનતામ્ ॥ ૯૮॥

ઉદકાવયવાનભિભૂય પયો
રજતાવયવાંશ્ચ યથા કનકમ્ ।
વિપરીતમતિં જનયત્યુદકે
રજતે ચ તથાયસિ હેમમતિમ્ ॥ ૯૯॥

રસવીર્યવિપાકવિનાશમનુ
પ્રવિનશ્યતિ કાઞ્ચનતાપ્યયસઃ ।
કૃતકં હિ ન નિત્યમિતિ પ્રગતં
સમવેતમવશ્યમપૈતિ યતઃ ॥ ૧૦૦॥

અમૃતત્વમસત્પુરુષસ્ય યદિ
ક્રિયતે સદુપાસનયા યજિવત્ ।
યજિકાર્યવદન્તવદેવ ભવે-
ત્કૃતકસ્ય યતો વિદિતાધ્રુવતા ॥ ૧૦૧॥

પુરુષસ્ય સતશ્ચ વિધર્મકયોઃ
સદુપાસનયા ન ભવેત્સમિતિઃ ।
યદિ સઙ્ગતિરિષ્યત એવ તયો-
રવિયુક્તતયા ન ચિરં વસતઃ ॥ ૧૦૨॥

ફલમીદૃગિદં સદુપાસનતઃ
પુરુષસ્ય ભવિષ્યતિ નાન્યદતઃ ।
ન ચ તન્નિરવદ્યતયાભિમતં
વિદુષાં બહુદોષસમીક્ષણતઃ ॥ ૧૦૩॥

સદુપાસનકર્મવિધાનપરં
ન ભવેદત એવ હિ તદ્વચનમ્ ।
અહમસ્મિ શરીરમિદં ચ મમે-
ત્યવિવેકમતિં વિનિવર્તયતિ ॥ ૧૦૪॥

સકલોપનિષત્સુ શરીરભૃતઃ
પરમાત્મપદૈકવિભક્તિતયા ।
ઉપદેશવચાંસ્યનયૈવ દિશા
ગમયેન્મતિમાનભિયુક્તતયા ॥ ૧૦૫॥

દ્રવિડોઽપિ ચ તત્ત્વમસીતિ વચો
વિનિવર્તકમેવ નિરૂપિતવાન્ ।
શબરેણ વિવર્ધિતરાજશિશો-
ર્નિજજન્મવિદુક્તિનિદર્શનતઃ ॥ ૧૦૬॥

યત એવમતઃ સ્વશરીરગતા-
મહમિત્યવિવેકમતિં સુદૃઢામ્ ।
પ્રવિહાય યદક્ષરમદ્વયકં
ત્વમવેહિ તદક્ષરમાત્મતયા ॥ ૧૦૭॥

ન મનો ન મતિઃ કરણાનિ ચ નો
ન રજો ન તમો ન ચ સત્ત્વમપિ ।
ન મહી ન જલં ન ચ વહ્નિરપિ
શ્વસનો ન નભશ્ચ પદં પરમમ્ ॥ ૧૦૮॥

અમનસ્કમધીકમનિન્દ્રિયકં
વિરજસ્કમસત્ત્વતમસ્કમપિ ॥

અમહીજલવહ્ન્યનિલામ્બરકં
પરમક્ષરમાત્મતયાશ્રય ભોઃ ॥ ૧૦૯॥

કરણાનિ હિ યદ્વિષયાભિમુખં

પ્રગમય્ય મતિર્વિષયેષુ ચરેત્ ।
તદ્દુ જાગરિતં પ્રવદન્તિ બુધા
ન તદસ્તિ મમેત્યવગચ્છ દૃશેઃ ॥ ૧૧૦॥

કરણાનિ યદોપરતાનિ તદા
વિષયાનુભવાહિતવાસનયા ।
વિષયેણ વિના વિષયપ્રતિમં
સ્ફુરણં સ્વપનં પ્રવદન્તિ બુધાઃ ॥ ૧૧૧॥

કરણસ્ય ધિયઃ સ્ફુરણેન વિના
વિષયાકૃતિકેન તુ યા સ્થિતતા ।
પ્રવદન્તિ સુષુપ્તિમમું હિ બુધા
વિનિવૃત્તતૃષઃ શ્રુતિતત્ત્વવિદઃ ॥ ૧૧૨॥

ઇતિ જાગરિતં સ્વપનં ચ ધિયઃ
ક્રમતોઽક્રમતશ્ચ સુષુપ્તિરપિ ।
ન કદાચિદપિ ત્રયમસ્તિ મમે-
ત્યવગચ્છ સદાસ્મિ તુરીયમિતિ ॥ ૧૧૩॥

યદ્દુ જાગરિતપ્રભૃતિ ત્રિતયં
પરિકલ્પિતમાત્મનિ મૂઢધિયા ।
અભિધાનમિદં તદપેક્ષ્ય ભવે-
ત્પરમાત્મપદસ્ય તુરીયમિતિ ॥ ૧૧૪॥

યદપેક્ષ્ય ભવેદભિધાનમિદં
પરમાત્મપદસ્ય તુરીયમિતિ ।
તદસત્યમસત્યગુણશ્ચ તતઃ
પરિનિર્મિતવારણચેષ્ટિતવત્ ॥ ૧૧૫॥

ગગનપ્રમુખં પૃથિવીચરમં
વિષયેન્દ્રિયબુદ્ધિમનઃસહિતમ્ ।
જનિમજ્જગદેતદભૂતમિતિ
શ્રુતયઃ પ્રવદન્ત્યુપમાનશતૈઃ ॥ ૧૧૬॥

કફપિત્તસમીરણધાતુધૃતં
કુશરીરમિદં સતતં હિ યથા ।
પ્રભવપ્રભૃતિ પ્રલયાન્તમિદં

જગદગ્નિરવીન્દુધૃતં હિ તથા ॥ ૧૧૭॥

જગતઃ સ્થિતિકારણમિત્થમિદં
પ્રથિતં રવિવહ્નિશશિત્રિતયમ્ ।
સ્મૃતિવેદજનેષુ ભૃશં પ્રથિતં
શ્રુતિરીરિતવત્યનૃતં તદિતિ ॥ ૧૧૮॥

યદુ રોહિતશુક્લસુકૃષ્ણમિદં
જ્વલનાદિષુ રૂપમવૈતિ જનઃ ।
તદુ તૈજસમાપ્યમથાન્નમિતિ
બ્રુવતી ત્રયમેવ તુ સત્યમિતિ ॥ ૧૧૯॥

રુચકપ્રમુખં કનકાદિમયં
રુચકાદ્યભિધાનનિમિત્તમપિ ।
અસદિત્યવગમ્યત એવ યતો
વ્યભિચારવતી રુચકાદિમતિઃ ॥ ૧૨૦॥

ન કદાચિદપિ વ્યભિચારવતી
કનકાદિમતિઃ પુરુષસ્ય યતઃ ।
તત એવ હિ સત્યતયાભિમતં
કનકાદિવિપર્યય એષુ ન હિ ॥ ૧૨૧॥

રુચકાદિસમં જ્વલનાદિ ભવે-
દનૃતત્વગુણેન તુ સત્યતયા ।
અરુણપ્રમુખં જ્વલનપ્રભૃતિ-
પ્રકૃતિત્રિતયં કનકાદિસમમ્ ॥ ૧૨૨॥

અનયોપમયાનૃતતામવદ-
ચ્છ્રુતિરગ્નિદિવાકરચન્દ્રમસામ્ ।
અમૃષાત્વમપિ શ્રુતિરુક્તવતી
ત્રિતયસ્ય તુ રક્તપુરઃસરિણઃ ॥ ૧૨૩॥

અનૃતત્વમિદં જ્વલનપ્રભૃતે-
ર્યદવાદિ ભવેત્તદુદાહરણમ્ ।
વિતથા વિકૃતિઃ સતતં સકલા
ન તથા પ્રકૃતિઃ શ્રુતિનિશ્ચયતઃ ॥ ૧૨૪॥

પ્રદિદર્શયિષુર્વસનસ્ય યથા
વિતથત્વમપાસ્યતિ તન્તુગુણમ્ ।
અપકૃષ્ય તુ તન્તુસમં ત્રિતયં
જ્વલનપ્રમુખસ્ય તથોક્તવતી ॥ ૧૨૫॥

અવનિપ્રમુખં વિયદન્તમિદં
વિકૃતિસ્તુ પરસ્ય ભવત્યપરમ્ ।
અનૃતં ત્વપરં વિકૃતિસ્તુ યતો-
ઽવિતથં તુ પરં પ્રકૃતિસ્તુ યતઃ ॥ ૧૨૬॥

અત એતદસેધિ સદુક્તિ પરં
ન મૃષેતિ મૃષા તુ તતોઽન્યદિતિ ।
ઇતિ સિદ્ધમતો યદવાદિ મયા
જનિમજ્જગદેતદભૂતમિતિ ॥ ૧૨૭॥

મનસોઽપ્યનૃતત્વમસેધ્યમુતઃ
પ્રતિપાદિતહેતુત એવ ભવેત્ ।
ચરિતં ચ તદીયમસત્યમતઃ
પરિનિર્મિતવારણચેષ્ટિતવત્ ॥ ૧૨૮॥

નનુ નાભ્યવદચ્છ્રુતિરુદ્ભવનં
મનસસ્તુ સતો ન ચ ખપ્રમુખાત્ ।
કથમસ્ય ભવેદનૃતત્વગતિ-
ર્મનસો ભગવન્વદ નિશ્ચયતઃ ॥ ૧૨૯॥

નનુ સપ્તમ આત્મન ઉદ્ભવનં
મનસોઽભિદધાવસુનાપિ સહ ।
કથમસ્ય ભવેદમૃષાત્વગતિ-
ર્મનસો વિકૃતિત્વગુણસ્ય વદ ॥ ૧૩૦॥

અસુના કરણૈર્ગગનપ્રમુખૈઃ
સહ મુણ્ડક ઉદ્ભવનં મનસઃ ।
પુરુષાત્પરમાત્મન ઉક્તમતો
વિતથં મન ઇત્યવધારય ભોઃ ॥ ૧૩૧॥

મનસોઽન્નમયત્વમવાદિ યત-
સ્તત એવ હિ ભૂતમયત્વગતિઃ ।

કુશરીરવદેવ તતોઽપિ ભૃશં
વિતથં મન ઇત્યવધારય ભોઃ ॥ ૧૩૨॥

કુરુ પક્ષમિમં ગગનપ્રમુખં
જનિમત્સકલં ન હિ સત્યમિતિ ।
પ્રથમં ચરમં ચ ન ચાસ્તિ યતો
રુચકાદિવદિત્યુપમાં ચ વદ ॥ ૧૩૩॥

કનકે રુચકાદિ ન પૂર્વમભૂ-
ચ્ચરમં ચ ન વિદ્યત ઇત્યનૃતમ્ ।
અધુનાપિ તથૈવ સમસ્તમિદં
જનિમાદ્ધિયદાદિ ભવેદનૃતમ્ ॥ ૧૩૪॥

કનકાદિષુ યદ્યુષજાતમભૂ-
દ્રુચકપ્રમુખં પૃથગેવ તતઃ ।
અધિકં પરિમાણમમીષુ કુતો
ન ભવેદિતિ વાચ્યમવશ્યમિદમ્ ॥ ૧૩૫॥

કનકપ્રભૃતેર્વ્યતિરિક્તમતો
રુચકાદિ ન વિદ્યત એવ કુતઃ ।
પૃથગગ્રહણાત્કનકપ્રભૃતે-
રિતિ કારણમેવ સદન્યદસત્ ॥ ૧૩૬॥

નનુ નામ પૃથગ્વિકૃતેઃ પ્રકૃતે-
રથ રૂપમથાપિ ચ કાર્યમતઃ ।
કથમવ્યતિરિક્તતયાવગમઃ
પ્રકૃતેર્વિકૃતેરિતિ વાચ્યમિદમ્ ॥ ૧૩૭॥

ઇહ વીરણતન્તુસુવર્ણમૃદઃ
કટશાટકહારઘટાકૃતયઃ ।
ઉપલબ્ધૃજનૈરુપલબ્ધિમિતા
ન ભિદાસ્તિ તતઃ પ્રકૃતેર્વિકૃતેઃ ॥ ૧૩૮॥

વિકૃતિર્યદિ નાસ્તિ પૃથક્પ્રકૃતે-
ર્ન ઘટેત ભિદાપ્યભિધાપ્રભૃતેઃ ।
ઇતિ ધીર્વિફલા તવ યેન જનૈ-
ર્વિવિદે નયનેન મૃદાદ્યભિદા ॥ ૧૩૯॥

નનુ રૂપમથો અપિ કાર્યમથો
અભિધાપિ નટસ્ય પૃથગ્વિદિતા ।
ન પૃથક્ત્વમુપૈતિ નટઃ કિમિતિ
પ્રતિવાચ્યમવશ્યમિદં કુશલૈઃ ॥ ૧૪૦॥

અસતો ન કથઞ્ચન જન્મ ભવે-
ત્તદસત્ત્વત એવ ખપુષ્પમિવ ।
ન સતોઽસ્તિ ભવઃ પુરતોઽપિ ભવા-
દ્યત આત્મવદેવ સદિષ્ટમિતિ ॥ ૧૪૧॥

કપિલાસુરિપઞ્ચશિખાદિમતં
પરિગૃહ્ય વદેદ્યદિ કશ્ચિદિદમ્ ।
ન કદાચન જન્મ વદામિ સતઃ
પ્રવદામિ તુ યચ્છૃણુ તત્ત્વમપિ ॥ ૧૪૨॥

પ્રકૃતાવવિશિષ્ટતયા યદભૂ-
દધુના તુ તદેવ વિશેષયુતમ્ ।
નિરવદ્યમિદં પ્રતિભાતિ મમ
પ્રવદાત્ર વિરોધમવૈષિ યદિ ॥ ૧૪૩॥

સદયુજ્યત યેન ગુણેન પુરા
પ્રકૃતૌ સ ઇહાસ્તિ ન ચેતિ વદ ।
યદિ વિદ્યત એવ પુરા પ્રકૃતા-
વધુનાપિ વિશેષયુતત્વમસત્ ॥ ૧૪૪॥

યદિ નાસ્તિ પુરા સ ગુણઃ પ્રકૃતા-
વસદુદ્ભવનં ભવતોઽભિમતમ્ ।
જનનેન ચ સત્ત્વમુપાત્તવતો
જનિમત્ત્વત એવ વિનષ્ટિરપિ ॥ ૧૪૫॥

ભવતોઽભિમતં પરિહર્તુમિદં
ન કથઞ્ચન શક્યત ઇત્યમુતઃ ।
કણભક્ષમતેન સમત્વમિદં
ભવતોઽભિમતં શનકૈરગમત્ ॥ ૧૪૬॥

અસતો ભવનં નશનં ચ સતઃ

કણભોજિમતં વિદિતં કવિભિઃ ।
ઉપપત્તિવિરુદ્ધતયા સુભૃશં
તદભાણિ મયાપિ વિરુદ્ધતયા ॥ ૧૪૭ ॥

પ્રતિષિદ્ધમિદં કણભોજિમતં
હરિણાપિ સમસ્તગુરોર્ગુરુણા ।
વચનેન તુ નાસત ઇત્યમુના
બ્રુવતા ચ પૃથાતનયાય હિતમ્ ॥ ૧૪૮ ॥

અસતશ્ચ સતશ્ચ ન જન્મ ભવે-
દિતિ પૂર્વમવાદ્યુપપત્તિયુતમ્ ।
સદસચ્ચ ન જાયત એવ કુતો
ન હિ વસ્તુ તથાવિધમાસ્તિ યતઃ ॥ ૧૪૯ ॥

સદસત્ત્વમતીત્ય મનઃપ્રભૃતે-
ર્ન કથઞ્ચન વૃત્તિરિહાસ્તિ યતઃ ।
તત એવ મનઃપ્રમુખસ્ય ભવો
ન ભવેદિતિ સર્વસુવેદમિતિ ॥ ૧૫૦ ॥

યદિ નામ કથઞ્ચિદમુષ્ય ભવઃ
સદસત્ત્વમપેક્ષ્ય ભવિષ્યતિ વઃ ।
અમૃષાત્વમમુષ્ય તથાપિ ન તુ
શ્રુતિરસ્ય મૃષાત્વમુવાચ યતઃ ॥ ૧૫૧ ॥

મનસોઽનૃતતૈવમવાદિ યત-
સ્તત એવ હિ તસ્ય મૃષા ચરિતમ્ ।
યત એવ મૃષા મનસશ્ચરિતં
તત એવ પુરોદિતસિદ્ધિરભૂત્ ॥ ૧૫૨ ॥

યદપેક્ષ્ય તુ નામ ભવેત્ત્રિતયં
પરમાત્મપદસ્ય તુરીયમિતિ ।
તદસત્યમસત્યગુણસ્તુ યતઃ
પરિનિર્મિતસર્પવિસર્પણવત્ ॥ ૧૫૩ ॥

નિખિલસ્ય મનઃપ્રમુખસ્ય યતો
વિતથત્વમવાદિ પુરા તુ મયા ।
શ્રુતિયુક્તિબલેન તતોઽદ્વયકં

પરમક્ષરમેવ સદન્યદસત્ ॥ ૧૫૪॥

યદપૂર્વમબાહ્યમનન્તરકં
ન ચ કિઞ્ચન તસ્ય ભવત્યપરમ્ ।
ઇતિ વેદવચોઽનુશશાસ યતો
વિતથં પરતોઽન્યદતઃ પ્રગતમ્ ॥ ૧૫૫॥

પ્રતિષિધ્ય યતો બહિરન્તરપિ
સ્વવિલક્ષણમાત્મન ઉક્તવતી ।
અવબોધઘનત્વમતોઽન્યદસ-
લ્લવણૈકરસત્વનિદર્શનતઃ ॥ ૧૫૬॥

લવણૈકરસત્વસમં ભણિતં
સ્વવિલક્ષણવસ્તુનિષેધનતઃ ।
અવબોધઘનં પરમાત્મપદં
ત્વમવેહિ તદસ્મિ સદાહમિતિ ॥ ૧૫૭॥

અણુ નો ન ચ તદ્વિપરીતગુણં
ન ચ હ્રસ્વમતો ન ચ દીર્ઘમપિ ।
પ્રતિષિદ્ધસમસ્તવિશેષણકં
પરમક્ષરમાત્મતયાશ્રય ભોઃ ॥ ૧૫૮॥

અસુબુદ્ધિશરીરગુણાન્ષડિમા-
નવિવેકિજનૈર્દૃશિધર્મતયા ।
પ્રતિપન્નતમાન્પ્રવિહાય શનૈ-
ર્દૃશિમાત્રમવેહિ સદાહમિતિ ॥ ૧૫૯॥

અહિનિર્લ્વયનીમહિરાત્મતયા
જગૃહે પરિમોક્ષણતસ્તુ પુરા ।
પરિમુચ્ય તુ તામુરગઃ સ્વબિલે
ન પુનઃ સમવેક્ષત આત્મતયા ॥ ૧૬૦॥

અવિવેકત આત્મતયા વિદિતં
કુશરીરમિદં ભવતાપ્યહિવત્ ।
અહિવત્ત્યજ દેહમિમં ત્વમપિ
પ્રતિપદ્ય ચિદાત્મકમાત્મતયા ॥ ૧૬૧॥

રજનીદિવસૌ ન રવેર્ભવતઃ
પ્રભયા સતતં યુત એષ યતઃ ।
અવિવેકવિવેકગુણાવપિ તૌ
ભવતો ન રવેરિવ નિત્યદૃશેઃ ॥ ૧૬૨ ॥

પરિશુદ્ધવિબુદ્ધવિમુક્તદૃશે-
રવિવેકવિવેકવિવર્જનતઃ ।
મમ બન્ધવિમોક્ષગુણૌ ભવતો
ન કદાચિદપીત્યવગચ્છ ભૃશમ્ ॥ ૧૬૩ ॥

ન મમ ગ્રહણોજ્ઝનમસ્તિ મયા
ન પરેણ દૃશેરિતિ નિશ્ચિનુ ભોઃ ।
ન હિ કસ્યચિદાત્મનિ કર્મ ભવે-
ન્ન ચ કશ્ચિદિહાસ્તિ મદન્ય ઇતિ ॥ ૧૬૪ ॥

અહમસ્મિ ચરસ્થિરદેહધિયાં
ચરિતસ્ય સદેક્ષક એક ઇતિ ।
ન ભવેદત એવ મદન્ય ઇતિ
ત્વમવેહિ સુમેધ ઇદં સુદૃઢમ્ ॥ ૧૬૫ ॥

ગગને વિમલે જલદાદિમલે
સતિ વાસતિ વા ન ભિદાસ્તિ યથા ।
ત્વયિ સર્વગતે પરિશુદ્ધદૃશૌ
ન ભિદાસ્તિ તથા દ્વયભેદકૃતા ॥ ૧૬૬ ॥

અનૃતં દ્વયમિત્યવદામ પુરા
વ્યવહારમપેક્ષ્ય તુ ગીતમિદમ્ ।
અનૃતેન ન સત્યમુપૈતિ યુજાં
ન મરીચિજલેન નદી હ્રદિની ॥ ૧૬૭ ॥

બહુનાભિહિતેન કિમુ ક્રિયતે
શ ૃણુ સઙ્ગ્રહમત્ર વદામિ તતઃ ।
ત્વયિ જાગરિતપ્રભૃતિ ત્રિતયં
પરિકલ્પિતમિત્યસદેવ સદા ॥ ૧૬૮ ॥

પરિકલ્પિતમિત્યસદિત્યુદિતં
મન ઇત્યભિશબ્દિતમાગમતઃ ।

ઉપપત્તિભિરેવ ચ સિદ્ધમતો
ભવતોઽન્યદશેષમભૂતમિતિ ॥ ૧૬૯॥

યદબાહ્યમનન્તરમેકરસં
યદકાર્યમકારણમદ્વયકમ્ ।
યદશેષવિશેષવિહીનતરં
દૃશિરૂપમનન્તમૃતં તદસિ ॥ ૧૭૦॥

ઇયદેવ મયોપનિષત્સુ પદં
પરમં વિદિતં ન તતોઽસ્ત્યધિકમ્ ।
ઇતિ પિપ્પલભક્ષ ઇવાભ્યવદ-
દ્ધ્યવશિષ્ટમતિં વિનિવારયિતુમ્ ॥ ૧૭૧॥

ઇતરોઽપિ ગુરું પ્રણિપત્ય જગૌ
ભગવન્નિતિ તારિતવાનસિ મામ્ ।
અવબોધતરેણ સમુદ્રમિમં
મૃતિજન્મજલં સુખદુઃખઝષમ્ ॥ ૧૭૨॥

અધુનાસ્મિ સુનિર્વૃત આત્મરતિઃ
કૃતકૃત્ય ઉપેક્ષક એકમનાઃ ।
પ્રહસાન્વિષયાન્મૃગતોયસમા-
ન્વિચરામિ મહીં ભવતા સહિતઃ ॥ ૧૭૩॥

તવ દાસ્યમહં ભૃશમામરણા-
ત્પ્રતિપદ્ય શરીરધૃતિં ભગવન્ ।
કરવાણિ મયા શકનીયમિદં
તવ કર્તુમતોઽન્યદશક્યમિતિ ॥ ૧૭૪॥

ગુરુશિષ્યકથાશ્રવણેન મયા
શ્રુતિવચ્છ્રુતિસારસમુદ્ધરણમ્ ।
કૃતમિત્થમવૈતિ ય એતદસૌ
ન પતત્યુદધૌ મૃતિજન્મજલે ॥ ૧૭૫॥

ભગવદ્ભિરિદં ગુરુભક્તિયુતૈઃ
પઠિતવ્યમપાઠ્યમતોઽન્યજનૈઃ ।
ગુરુભક્તિમતઃ પ્રતિભાતિ યતો
ગુરુણોક્તમતોઽન્યભજન્ન પઠેત્ ॥ ૧૭૬॥

નિગમોઽપિ ચ યસ્ય ઇતિપ્રભૃતિ-
ર્ગુરુભક્તિમતઃ કથિતં ગુરુણા ।
પ્રતિભાતિ મહાત્મન ઇત્યવદ-
ત્પઠિતવ્યમતો ગુરુભક્તિયુતૈઃ ॥ ૧૭૭॥

યેષાં ધીસૂર્યદીપ્ત્યા પ્રતિહતમગમન્નાશમેકાન્તતો મે
ધ્વાન્તં સ્વાન્તસ્ય હેતુર્જનનમરણસન્તાનદોલાધિરૂઢેઃ ।
યેષાં પાદૌ પ્રપન્નાઃ શ્રુતિશમવિનયૈર્ભૂષિતાઃ શિષ્યસઙ્ઘાઃ
સદ્યો મુક્તાઃ સ્થિતાસ્તાન્યતિવરમહિતાન્યાવદાયુર્નમામિ ॥ ૧૭૮॥

ભૂઃ પાદૌ યસ્ય ખં ચોદરમસુરનિલશ્ચન્દ્રસૂર્યૌ ચ નેત્રે
કર્ણાવાશાઃ શિરો દ્યૌર્મુખમપિ દહનો યસ્ય વાસ્તેયમબ્ધિઃ ।
અન્તઃસ્થં યસ્ય વિશ્વં સુરનરખગગોભોગિગન્ધર્વદૈત્યૈ-
શ્ચિત્રં રંરમ્યતે તં ત્રિભુવનવપુષં વિષ્ણુમીશં નમામિ ॥ ૧૭૯॥

ઇતિ શ્રી તોટકાચાર્યવિરચિતં શ્રુતિસારસમુદ્ધરણં સમાપ્તમ્ ॥

The text is composed in a meter called toTaka.

Encoded and proofread by Sunder Hattangadi

---

*Shrutisarasamuddharanam*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*